# Shri Shivananda Stotram

# श्रीशिवानन्दस्तोत्रम्

## Document Information

Text title : Shri Shivananda Stotram

File name : shivAnandastotram.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Kumudaranjana Goswami

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीशिवानन्दस्तोत्रम्

लीलासहचरं नित्यमीश्वरस्य युगे युगे ।
शिवकल्पं शिवानन्दं भूयो भूयो नमाम्यहम् ॥ १॥

निर्विकल्प-समाधीप्सा बाल्यादेवाश्रयच्च तम् ।
त्यागमूर्तिं तितिक्षुं यं प्राप्य सिद्धिमिताऽचिरम् ॥ २॥

अलौकिकान् गुणान् दृष्ट्वा विवेकानन्दरूपिणा ।
"महापुरुष" इत्याख्या यस्मै दत्ता निजेच्छया ॥ ३॥

भारतीयानि तीर्थानि परिक्रम्य स्वलीलया ।
सर्वत्रैवेश्वरं रूपं दृष्टवन्तं नमामि तम् ॥ ४॥

बहिर्यद् दृश्यते किं च सर्वं तदीश्वरात्मकम् ।
ईशातिरिक्तं नास्तीति मुक्तकण्ठं व्यघोषयत् ॥ ५॥

श्रीरामकृष्णदेवं श्रीशारदां जननीं तथा ।
विवेकानन्दमूर्तिं योऽपश्यद् हृदि निरन्तरम् ॥ ६॥

मुमुक्षूणामसङ्ख्यानामाध्यात्मिकजलं ददत् ।
न्यपूरयन्मनस्तृष्णां शिवानन्दं नमामि तम् ॥ ७॥

अनिर्वाणप्रदीपस्य शिखावत् सत्यविग्रहम् ।
शिवानन्दं सदा नौमि धर्ममार्गं प्रदर्शकम् ॥ ८॥

श्रीरामकृष्णसङ्घस्य द्वितीयं नायकं विभुम् ।
शिवकल्पं शिवानन्दमनन्तं प्रणमामि तम् ॥ ९॥

शिवानन्दस्य चरितं स्मरन्तः शुद्धमानसाः ।
ब्रह्मस्वरूपतामन्ते यान्ति नास्त्यत्र संशयः ॥ १०॥

इति अध्यापकपण्डित श्रीकुमुदरञ्जनगोस्वामीतर्कवेदान्ततीर्थविरचितं
"श्रीमत्शिवानन्दस्तोत्रम्" सम्पूर्णम् ।

प्रणाममन्त्रः-
शिवे यस्य पराभक्तिस्त्यागेऽपि रतिरुत्तमा ।
अहेतुककृपासिन्धुं शिवानन्दं नमाम्यहम् ॥

Proofread by Aruna Narayanan

*Shri Shivananda Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*